यलोपः, चकारस्य कुत्वम्, मधुग् इति [1]सिद्धम्। शकारादौ पुनरेतस्मिन् संयोगान्तलोपेन [2]यकारचकारयोः लुप्तयोः शकारस्य षत्वे सति मधुड् इति स्यात्।

[९०६] अभ्यासजश्त्वचर्त्वे एत्वतुकोः सिद्धे वक्तव्ये। (म. भा. ३. ३९३)

बभणतुः। बभणुः। [3]अभ्यासजश्त्वस्यासिद्धत्वात् अनादेशादेः इति एत्वं प्राप्नोति। [4]छिदेः विचिच्छित्सति, [5]उच्छेः उचिच्छिषति इति अभ्यासादेशस्य असिद्धत्वात् 'छे च' (६.१.७३/१४६) इति तुक् न प्राप्नोति।

[९०७] द्विर्वचने [6]परसवर्णत्वं सिद्धं वक्तव्यम्। (म. भा. ३. ३९३)

सयँ् यँ् यन्ता, सवँ् वँ् वत्सरः, [7]यलँ् लँ् लोकम्, तलँ् लँ्लोकम् इति परसवर्णस्यासिद्धत्वाद् यरः (८. ४. ४७/४८ ) इति द्विर्वचनं न स्यात्।

[९०८] [8]पदाधिकारश्चेल् लत्वघत्वढत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि सिद्धानि वक्तव्यानि। (म. भा. ३. ३९३)

लत्वम् – गलो गलः, गरो गरः। घत्वम् – द्रोग्धा द्रोग्धा। ढत्वम् – द्रोढा द्रोढा। नत्वम् – नुन्नो नुन्नः, नुत्तो नुत्तः। रुत्वम् – अभिनोऽभिनः, अभिनदभिनत्। षत्वम् – मातुःष्वसा मातुःष्वसा, मातुःस्वसा मातुःस्वसा। पितुःष्वसा पितुःष्वसा, पितुःस्वसा पितुःस्वसा। णत्वम् – माषवापाणि माषवापाणि, माषवापानि माषवापानि। अनुनासिकम् – वाङ्नयनं वाङ्नयनम्, वाग्नयनं वाग्नयनम्। छत्वम् – वाक्छयनं वाक्छयनम्, वाक्शयनं वाक्शयनम्। लत्वादीनां [9]विकल्पितानामसिद्धत्वात् कृते द्विर्वचने सत्युपरिष्टाद् [10]विकल्पे सति गरो गलः, गलो गरः इत्येवं रूपमपि द्विरुक्तं स्यात्। तदेतत् सर्वं न मु ने इति [11]योगविभागेन साध्यते। न इत्येतावदनिष्टे विषये पूर्वत्रासिद्धस्य प्रतिषेधार्थम्। ततो मु ने इति। [12]नेत्येतदनुवर्तते॥

## उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य। (४/३६६७)

उदात्तयणः स्वरितयणश्च परस्या[13]नुदात्तस्य स्वरितः आदेशो भवति। उदात्तयणः – कुमार्यौ। कुमार्यः। उदात्तनिवृत्तिस्वरेण अयमीकारः उदात्तः, तस्य स्थाने यणादेशः [14]स उदात्तयण्[15], तस्मात् परस्य अनुदात्तस्य स्वरितः आदेशो भवति। स्वरितयणः – सकुल्ल्व्याशा। खलप्व्याशा। सकुल्लूः, खलपूः इति कृत्स्वरेण [16]अन्तोदात्तौ, तयोः 'रोः सुपि' (८. ३. १६/३३९) इति यणादेशः, स उदात्तयण्, ततः परस्य सप्तम्येकवचनस्य स्वरितत्वम्, तस्य [17]यणादेशः स्वरितयण्, तस्मात् स्वरितयणः परस्य आशा[18]शब्दाकारस्य अनुदात्तस्य स्वरितो[19]

---

1. भवति क. 2. शकारचकारयोः ब. 3. अभ्यासादेशस्य ब. इ. 4. छिदेः नास्ति क. 5. उच्छेः नास्ति क. 6. परसवर्णः सिद्धो वक्तव्यः क. 7. नास्ति ब. 8. पदाधिकारस्य क. 9. विकल्पेनापि सिद्धत्वात् क. 10. अनिष्टो हि तद्विकल्पः प्राप्नोति ब. 11. योगविभागात् सिध्यति क. 12. तत्र न इत्यनुवर्तते फ. 13. स्वरस्य इत्यधिकम् क. 14. स नास्ति ब. इ. ह. 15. भवति इत्यधिकम् क. इ. 16. अन्तोदात्तः क. 17. यो अण् इ. ह. 18. शब्दस्य अकारस्य क. 19. आदेशो इत्यधिकम् क. ह.